**6 यत्तु ··· नासत्त्वम्** ] Quoted in *Śṛṅgāraprakāśa* 303.20: यत्तु देशभेदेनाग्रहणात्, तदग्रहे तद्बुद्ध्यभावादिति तत्र जातेस्तदाश्रितत्वं, नासत्त्वम्।

---

**1 परिहृतं** ] $K_1$; प्रतिहतं $MVA_1$; परिहतं $Z_1$ **3 यत्तावदवादि** ] $MVK_1Z_1$; सत्तावदनादि $A_1$ **3 कुवलयामलकबिल्वादि॰** ] $K_1$; कुवलयामलकादि॰ $MVZ_1$; बधरामलक॰ $A_1$ **3 ॰दनवभासना॰** ] $MVA_1Z_1$; ␣␣␣भासा॰ $K_1$ **6 ॰भावात्" इति** ] $MVK_1Z_1$; ॰भावादिभवादितः $M^{ka}M^{gha}$; ॰भावादितः $A_1$ **7 नासत्त्वम्** ] $A_1Z_1$; न त्वसत्त्वम् MV; नासतः $K_1$ **7 ॰वृत्तित्वाज्जातेः** ] $MVK_1Z_1$; ॰वृक्तिज्जातेः $A_1$

तयानुपलम्भस् तदग्रहे, न पुनस्तदतिरिक्ताया अभावादिति।

[3.2.3 वृत्त्युपपादनम्]

यदप्युक्तम् "वृत्त्यनुपपत्तेः" इति, तत्राप्युच्यते—प्रतिपिण्डं कात्स्न्र्येनैव जातिर्वर्तत इति। पिण्डान्तरे तदुपलम्भो न स्यादिति चेत्, किं कुर्मः। कमुपालभामहे। पिण्डान्तरे तदुपलम्भो ऽस्त्येव। कथं च भवन्तमेनं निह्नुमहे। एकदेशास्तु जातेर्न सन्त्येव, यैरस्या वर्तनं ब्रूमः।

क्वेदमन्यत्र दृष्टं चेद् अहो निपुणता तव।

---

**3** यदप्युक्तम् ⋯ सन्त्येव ] Quoted in *Śṛṅgāraprakāśa* 303.21–22: यदप्युक्तं वृत्त्यनुपपत्तेरिति तत्राप्युच्यते, प्रतिपिण्डं कात्स्न्र्येनैव जातिर्वर्तत इति पिण्डान्तरे तदुपलम्भो ऽस्त्येव। एकदेशास्तु जातेर्न सन्त्येव।
**3** यद॰ ⋯ इति ] *Nyāyamañjarī* II 7.14–16: तद्वृत्तित्वात् सामान्यस्य तदग्रहे तदनुपलब्धिरिति चेत्। न, वृत्त्यनुपपत्तेः। किं प्रतिपिण्डं कात्स्न्र्येन वर्तते जातिः, उतैकदेशेनेति। द्वयमपि चानुपपन्नम्।
**4** पिण्डान्तरे ⋯ चेत् ] *Nyāyamañjarī* II 7.17–18: पिण्डे सामान्यमेकत्र यदि कात्स्न्र्येन वर्तते। तत्रैवास्य समाप्तत्वान्न स्यात् पिण्दान्तरे ग्रहः॥
**6** एकदेशास्तु ] *Nyāyamañjarī* II 7.19–20: एकदेशेन वृत्तौ तु गोत्वजातिर्न कुत्रचित्। समग्रास्तीति गोबुद्धिः प्रतिपिण्डं कथं भवेत्॥
**8** क्वेदमन्यत्र दृष्टं ] *Nyāyamañjarī* II 8.4–5: तथाभूतस्य च वृत्तिप्रकारस्य क्वचिदप्यदर्शनात्।
**8** क्वेदमन्यत्र ⋯ ऽप्यनुमानवत् ] Quoted in *Śṛṅgāraprakāśa* 303.23–24.

---

**1** ॰पलम्भस् ] $MVA_1Z_1$; ॰पलाभस् $K_1$ **1** तदग्रहे ] $K_1$; तदग्रहे तदग्रहो वा M; तदग्रहो वा $M^{ka}M^{kha}M^{gha}VA_1$(marked); तदग्रहे ऽपि $Z_1$ **1** न ] $MVA_1Z_1$; न च $K_1$ **1** ॰क्ताया ] $MVA_1$; ॰क्ताया जातेर् $K_1$; ॰क्तताया $Z_1$ **1** अभावादिति ] $K_1$; अभावादेवेति $MVA_1$; अभावादेव $Z_1$ **4** कात्स्न्र्येनैव ] $VK_1Z_1$; कात्स्न्र्येन M; कत्स्येनैव $A_1$ **4** जातिर्व॰ ] $MVK_1Z_1$; सति व॰ $A_1$ **5** चेत् ] $MVA_1Z_1$; om. $K_1$ **5** कमुपालभामहे ] $K_1$; कमुपलभामहे $MVZ_1$; किमुपलभामहे $A_1$ **5** पिण्डान्तरे ] $K_1$; पिण्डान्तरे ऽपि $MVA_1Z_1$ **6** जातेर्न ] $MVK_1Z_1$; जातेन $A_1$ **8** क्वेदमन्यत्र दृष्टं चेद् ] $MK_1$; क्वेदमन्यत्र चेत् $M^{kha}VA_1Z_1$(unmetrical)

दृष्टान्तं याचसे यस्त्वं प्रत्यक्षे ऽप्यनुमानवत्॥

[3.2.4 समवायः]

किंनामधेयैषा वृत्तिरिति चेत्, न नामधेयमस्या जानीमः। पिण्डसमवेता जातिरित्येतावदेव प्रचक्ष्महे।

नन्वयुतसिद्धयोः संबन्धः समवायः। स च भेदप्रतिषेधादेव निरस्तः। न शक्यते निरसितुम्।

प्रतीतिभेदाद् भेदो ऽस्ति देशभेदस्तु नेष्यते।
तेनात्र कल्प्यते वृत्तिः समवायः स उच्यते॥

अवयवावयविनोर्गुणगुणिनोश्चेयमेव वृत्तिः। तयोरर्थान्तरत्वमुपरि-

---

**3 किंनामधेयैषा ··· निरसितुम्** ] Quoted in *Śṛṅgāraprakāśa* 304.1–2: किंनामधेया वृत्तिरियमिति चेन्न नामधेयमस्याः जानीमः, पिण्डसमवेता जातिरित्येव प्रचक्ष्महे। नन्वयुतसिद्धयोस्सम्बन्धः समवायः, स विप्रतिषेधादेव निरस्तः? न शक्यते निरसितुम्।
**5 नन्वयुतसिद्धयोः ··· निरस्तः** ] *Nyāyamañjarī* II 8.10–13: अयुतसिद्धता च संबन्धश्चेति कथं संगच्छेत। पृथक्सिद्धे हि वस्तुनी कुण्डबदरवद् अन्योन्यं संबध्येते स्त्रीपुंसवद्वा। अयुतसिद्धत्वे तु तदेकत्वात् किं केन संबध्येत। न ह्यहं मयैव संबध्ये।
**7 प्रतीतिभेदाद् ··· उच्यते** ] Quoted in *Śṛṅgāraprakāśa* 304.3–4: प्रतीतिभेदाद्भेदो ऽस्तु देशभेदस्तु नेष्यते। तेनावकल्पते वृत्तिस्समवायस्स तूच्यते॥
**9 अवयवावयवि° ··· °युतसिद्धत्वम्** ] Quoted in *Śṛṅgāraprakāśa* 304.5–6: अवयवा[व]यविनोर्गुणगुणिनोश्चेयमेव वृत्तिः। अर्थान्तरत्वं चैतयोर्जातितुल्यन्यायतया सिद्धमेव। देशभेदश्च तयोर्नास्तीति विस्पष्टमयुतसिद्धत्वम्।
**9 °र्गुणगुणिनोश्चे°** ] *Nyāyamañjarī* II 8.15–16: द्रव्यगुणयोरपृथक्सिद्धयोरपि

---

**1 दृष्टान्तं ··· प्रचक्ष्महे** ] $MVK_1Z_1$; देवप्रचक्ष्महे $A_1$ **1 यस्त्वं प्रत्यक्षे ऽप्यनुमानवत्** ] $MK_1Z_1$; यस्यात्पक्षे प्रत्यनुमानवत् $M^{ka}M^{ga}$; यस्त्वं प्रत्यनुमानवत् $M^{kha}$V(unmetrical) **3 °धेयमस्या** ] $MZ_1$; °धेयं V; °धेयस्या $K_1$ **5 संबन्धः** ] $MVA_1Z_1$; सम्बन्ध $K_1$ **5 भेदप्रतिषेधादेव** ] $K_1$; विप्रतिषेधादेव $MVA_1Z_1$ **6 निरसितुम्** ] $MVK_1Z_1$; निरसितं $A_1$ **8 स उच्यते** ] $MVK_1Z_1$; (स च विप्रतिषेधादेव निरस्तः न शक्यते निर) स उच्यते $A_1$ **9 अवयवावयवि°** ] $MVA_1Z_1$; अवयवालयवि° $K_1$

ष्टाद्दर्शयिष्यते। दर्शितं चामुनैव मार्गेण। देशभेदश्च तयोर्नास्तीति विस्पष्टमयुतसिद्धत्वम्।

### [3.2.5 अयुतसिद्धत्वम्]

यदप्युच्यते—

नानिष्पन्नस्य संबन्धो निष्पत्तौ युतसिद्धता।

इति, तदपि परिहृतमाचार्यैः “जातं संबद्धं चेत्येकः कालः” इति वदद्भिः। सर्वं चैतदबाधितप्रतीतिबलात्कल्प्यते, न स्वशास्त्रपरिभाषया।

---

संबन्धो विद्यत एवेति चेत्। तदिदमनुन्मत्तस्योन्मत्तसंवर्णनम्, गुणिनो ऽपि गुणव्यतिरिक्तस्यानुपलम्भात्।

**1** °द्दर्शयिष्यते ] *Nyāyasūtra* 2.1.33–36: साध्यत्वादवयविनि संदेहः। ··· सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम्।

**4** यदप्युच्यते ] *Nyāyamañjarī* II 8a.9–11: अवयवावयविनोरपि समवायात्मा संबन्ध एवमेव परिहर्तव्यः। यथाह भट्टः—नानिष्पन्नस्य संबन्धो निष्पत्तौ युतसिद्धता॥ इति।

**4** यदप्युच्यते ··· इति वदद्भिः ] Quoted in *Śṛṅgāraprakāśa* 304.6–8: यदप्युच्यते—‘नानिष्पन्नस्य सम्बन्धो निष्पत्तौ युतसिद्धता।’ इति तदपि परिहृतमाचार्यैः ‘जात(तं) सम्बन्धं(द्धं) चेत्येकः काल’ इति वदद्भिः।

**5** नानिष्पन्नस्य ··· युतसिद्धता। *Ślokavārttika pratyakṣa* 146cd

**6** °माचार्यैः ] *Nyāyavārttika* ad 2.1.33, 225.5–6: जातं संबद्धं चेत्येकः कालः; see also Halbfass [1992:190]; *Nyāyamañjarīgranthibhaṅga* 135.10–11: परिहृतमाचार्यैः “निष्ठासम्बन्धयोरेककालत्वात्” इत्यादि वदद्भिः। (For Cakradhara’s quote, see Halbfass [1992:179]; the formula goes back at least to Praśastapāda’s lost *Vākya* on the *Vaiśeṣikasūtra*.)

---

**1** चामुनैव ] MVK$_1$; चामुनै A$_1$; वामुनैव Z$_1$ **4** यदप्युच्यते ] MVA$_1$Z$_1$; यदुच्यते K$_1$ **5** युतसिद्धता ] MVA$_1$Z$_1$; युतसिद्धिता K$_1$ **6** जातं ] A$_1$; जातिं च MZ$_1$; जातं च V; जातिं K$_1$ **7** वदद्भिः ] MVA$_1$Z$_1$; विवदद्भिः K$_1$ **7** °बाधित° ] MVZ$_1$; °बाधितदबाधित° A$_1$; °बाधितं K$_1$

## [3.2.6 विभूनां संबन्धः]

विभूनामपि संबन्धः परस्परमसंभवादेव नेष्यते, न परिभाषणात्। न संयोगः, तेषामप्राप्तेरभावात्। अप्राप्तिपूर्विका हि प्राप्तिः संयोगः। न समवायः, तदाश्रितस्य तस्यानुपलम्भात्—इत्यलं प्रसङ्गेन।

## [3.2.7 उपसंहारः]

ये चेह वृत्ती स्रक्सूत्रभूतकण्ठगुणादिषु।
जात्यादीनामनङ्गत्वात् ताभ्यां वृत्तिर्विलक्षणा॥

---

**2 विभूनामपि संबन्धः** ] *Nyāyamañjarī* II 8a.4–5: विभूनां परस्परमाकाशादीनां संबन्ध एव नास्ति इति, तदपि प्रक्रियामात्रम्।; *Padārthadharmasaṃgraha* 30.10–11 (section 179): विभूनां तु परस्परतः संयोगो नास्ति, युतसिद्ध्यभावात्।
**3 अप्राप्तिपूर्विका हि प्राप्तिः संयोगः** ] *Abhidharmakośabhāṣya* IX, 1222.11–1223.1: संयोगिनोश्च परिच्छिन्नत्वाद् अप्राप्तिपूर्विका प्राप्तिः संयोग इति लक्षणव्याख्यानाच्चात्मनः परिच्छेदप्रसङ्गः।; *Padārthadharmasaṃgraha* 28.12–13 (section 168): अप्राप्तयोः प्राप्तिः संयोगः।; *Bhāmatī* ad 2.2.38, 569.25: अप्राप्तिपूर्विका हि प्राप्तिः संयोयो न सर्वगतानां संभवति, अप्राप्तेरभावान्निरवयवत्वाच्च।
**6 ये चेह वृत्ती** ] *Nyāyamañjarīgranthibhaṅga* 135.12–14: ये चेह वृत्ती इति। स्रजि सूत्रं हि व्यासज्य प्रतिपुष्पमेकदेशेन वर्तमानं दृष्टं, भूतानां चालेख्यगतानां कण्ठे यो गुणः स्रग्दामादिः स प्रत्येकं सर्वात्मना वर्तमान उपलब्धः।
**6 ये चेह वृत्ती ··· वृत्तिर्विलक्षणा** ] Quoted in *Śṛṅgāraprakāśa* 304.9–10: या चेह वृत्तिः स्रक्सूत्रभूतकण्ठगुणादिषु। जात्यादीनामनङ्गत्वात्ताभ्यां वृत्तिर्विलक्षणा॥
**6 स्रक्सूत्रभूतकण्ठगुणादिषु** ] Cf. *Ślokavārttika vana* 35: या चावयवशो वृत्तिः स्रक्सूत्रादिषु दृश्यते। भूतकण्ठगुणादेश्च प्रतिपिण्डं समाप्तितः॥

---

**2 विभूनामपि** ] $MVA_1Z_1$; विभुतानामपि $K_1$   **2 परिभाषणात्** ] $M^{kha}VK_1Z_1$; स्वशास्त्रपरिभाषणात् M; स्वशास्त्रपरिभाषाणां $A_1$   **3 हि प्राप्तिः** ] $MVA_1$; प्राप्तिः $K_1$; प्राप्तिर्हि $Z_1$   **4 समवायः** ] $MA_1Z_1$; च समवायस् $VK_1$   **4 °श्रितस्य तस्या°** ] $MVK_1Z_1$; °श्रितस्या° $A_1$   **6 वृत्ती स्रक्सू°** ] $MVK_1Z_1$; वृत्तीस्तन्° $A_1$(marked)   **6 °कण्ठ°** ] $MVK_1$; °कण्ठे $M^{ka}M^{ga}A_1Z_1$   **7 °मनङ्गत्वात्** ] $K_1$; °मनंशत्वात् $MVZ_1$; °मनीशत्वात् $M^{ka}M^{ga}A_1$   **7 °लक्षणा** ] $MVA_1Z_1$; °लक्षणाः $K_1$

तस्माद् वृत्त्यनुपपत्तेरित्यदूषणम्।

## [3.3 जातिः सर्वसर्वगता पिण्डसर्वगता वा]

यदपि सर्वसर्वगतत्वं पिण्डसर्वगतत्वं च विकल्प्य दूषितम्, तदपि यत्किंचित्। यथा प्रतीतिरादिशति भगवती, तथा वयमभ्युपगच्छामः।

### [3.3.1 जातेः सर्वसर्वगतत्वम्]

सर्वसर्वगता जातिरिति तावदुपेयते।
सर्वत्राग्रहणं तस्या व्यञ्जकव्यक्त्यसन्निधेः॥
व्यक्तिर्व्यञ्जकतामेति जातेर्दृष्ट्यैव नान्यथा।
दृष्टिर्यत्र यदा व्यक्तेस् तदा तत्रैव तन्मतिः॥
सर्वत्र विद्यते जातिर् न तु सर्वत्र दृश्यते।
तदभिव्यञ्जिका यत्र व्यक्तिस्, तत्रैव दृश्यते॥

---

**1 तस्माद् ··· वयमभ्युपगच्छामः** ] Quoted in *Śṛṅgāraprakāśa* 304.11–12: तस्माद् वृत्त्यनुपपत्तेरित्यदूषणम्। यदपि सर्वसर्वगतत्वं पिण्डसर्वग[त]त्वं च विकल्प्य दूषितं तदपि यत्किञ्चित्; यथाप्रतीति तदभ्युपगमात्।
**3 यदपि ··· दूषितम्** ] *Nyāyamañjarī* II 8b.17–18: अपि चेयं जातिः—सर्वसर्वगता वा स्यात् पिण्डसर्वगतापि वा।
**7 सर्वसर्वगता ··· ऽन्यत्र दृश्यते** ] Seven verses are all quoted in *Śṛṅgāraprakāśa* 304.13–26 (1c. सर्वत्र ग्रहणं for सर्वत्राग्रहणं; 1d. °व्यक्त(क्ति)सन्निधेः for °व्यक्त्यसन्निधेः; 2c. त्वस्यास् for व्यक्तेस्; 7c. तस्मादस्मि° for तस्मात्तस्मि°).

---

**1 वृत्त्य°** ] $MVA_1K_1^{pc}Z_1$; वृत्त्या° $K_1^{ac}$ **3 सर्वसर्वगतत्वं** ] em.; सर्वगतत्वं $MVK_1Z_1$; सर्ववैसर्ववागता $A_1$ **3 पिण्डसर्व°** ] $A_1K_1$; पिण्ड° $MVZ_1$ **3 °गतत्वं** ] $MVK_1Z_1$; °गत्वं $A_1$ **3 दूषितम्** ] $MVK_1Z_1$; om. $A_1$ **3 तदपि** ] $MVK_1Z_1$; तदपि द्दर्शितं $A_1$ **4 °रादिशति** ] $MVA_1K_1$; °रादिश्यते $Z_1$ **4 तथा** ] $MVA_1Z_1$; तथा च $K_1$ **4 °मभ्युप°** ] $MK_1Z_1$; °मप्युप° $M^{kha}V$; °मित्युप° $A_1$ **8 °सन्निधेः** ] $MVK_1Z_1$; °सन्निधिः $A_1$ **9 °कतामेति** ] $MVA_1K_1$; °कामेति $Z_1$(unmetrical) **9 °र्दृष्ट्यैव** ] $MZ_1$; °र्दृष्टैव $VA_1$; °र्दृष्टे च $K_1$

व्यक्तेरन्यत्र सत्त्वे ऽस्याः किं प्रमाणं, तदुच्यते।
इहाप्यानीयमानायां गवि गोत्वोपलम्भनम्॥
गोपिण्डेन सहैतस्या न चागमनसंभवः।
देहेनेवात्मनस्, तस्मादिहाप्यस्तित्वमिष्यताम्॥
अभिव्यक्तिस्तु तत्काला यत्कालं व्यक्तिदर्शनम्।
तस्मात्सकृदभिव्यक्ता नान्यदापि प्रतीयते॥
अभिव्यक्तिश्च तद्देशा यद्देशा व्यक्तिरीक्ष्यते।
तस्मात्तस्मिन्नभिव्यक्ता न देशे ऽन्यत्र दृश्यते॥

[3.3.2 जातेर्व्यक्तिसर्वगतत्वम्]

व्यक्तिसर्वगतत्वे ऽपि स्वयूथ्यैः कैश्चिदाश्रिते।
भविष्यत्यद्य जातायां गवि गोधीस्तथा ग्रहात्॥
जायमानैव हि व्यक्तिर्जायते जातियोगिनी।

---

**10 व्यक्तिसर्वगतत्वे** ] *Nyāyamañjarī* II 8c.12–13: पिण्डसर्वगतत्वे तु काममेतद्दूषणम्। किं तु नैवाद्य जातायां गवि गोप्रत्ययो भवेत्॥; *Padārthadharmasaṃgraha* 81.2–3 (section 361): स्वविषयसर्वगतम्।

**10 व्यक्तिसर्वगतत्वे ··· °र्निरूप्यताम्** ] Eight verses are all quoted in *Śṛṅgāraprakāśa* 305.1–16 (1a. पिण्डसर्वगतत्वे for व्यक्तिसर्वगतत्वे; 1c. °त्यन्यजातायां for °त्यद्य जातायां; 3d. °दृशैवो° for °दृश्येवो°; 4ab. °तीदं तु येन for °तीत्थं च ये वा; 4d. तेन for ते नः; 4d. पर्यनुयुज्यताम् for पर्यनुयुञ्जताम्; 7a. च for वा; 7d. °न्यजातं for °द्यजातं

---

**1 ऽस्याः** ] $K_1$; ऽस्य M; स्यात् $M^{ka}M^{kha}M^{gha}VA_1Z_1$ **2 इहाप्यानीय°** ] $MVK_1Z_1$; इहापि नीय° $A_1$ **3 सहैतस्या** ] $MVZ_1$; सहेतस्या $A_1$; सहैतस्य $K_1$ **3 °संभवः** ] $MVK_1Z_1$; °संभवाः $A_1$ **4 देहेनेवात्म°** ] $MVA_1K_1$; देहेनैवात्म° $Z_1$ **5 यत्कालं** ] $MVA_1K_1$; तत्कालं $Z_1$ **6 नान्यदापि** ] $MVZ_1$; नु देशे न्यत्र $A_1$; नान्यादापि $K_1$ **6 प्रतीयते ··· दृश्यते** ] $MVK_1Z_1$; दृश्यते $A_1$ **7 °रीक्ष्यते** ] $MVK_1Z_1$; °रिष्यते $M^{en}$ **8 °त्तस्मिन्न°** ] $K_1Z_1$; °त्तस्माद° MV **11 गवि** ] $MVK_1Z_1$; गवि यो $A_1$(unmetrical) **12 जातियोगिनी** ] $K_1$; प्रतियोगिनी $MVA_1Z_1$

एक एव हि कालो ऽस्या जातिसंबन्धजन्मनोः॥
नेह जातेः पुरास्तित्वं न च संक्रान्तिरन्यतः।
किं तु स्वहेतोः सा व्यक्तिस्तादृश्येवोपजायते॥
कथमेतदितीत्थं च ये वा पर्यनुयुञ्जते।
इदमप्यपरं हन्त ते नः पर्यनुयुञ्जताम्॥
वृषः पिशङ्गो गौः कृष्णा सा च नीलतृणाशनी।
ताभ्यामुत्पादितो वत्सः कथं भवति पाण्डरः॥
यथा रूपादिसंबद्धा सा व्यक्तिरुपलभ्यते।
तथैव जातियुक्तेति का ते व्यसनसन्ततिः॥
अगोव्यावृत्ततायां वा नैष प्रश्नो निवर्तते।
कस्मादगोनिवृत्तं तदद्य जातं स्वलक्षणम्॥
तस्माद्वस्तुस्वभावस्य विदित्वाननुयोज्यताम्।

---

**9** का ते व्यसनसन्ततिः ] *Nyāyamañjarīgranthibhaṅga* 135.15–17: का ते व्यसनसन्ततिः। यामभ्यधाद्भवान्— न याति न च तत्रासीदस्ति पश्चान्न चांशवत्। जहाति पूर्वं नाधारमहो व्यसनसन्ततिः॥ (*Pramāṇavārttika* I 152) इति।

---

**1** जाति॰ ] $M^{ka}M^{gha}A_1K_1$; जातेः $MVZ_1$ **2** पुरास्तित्वं ] $VA_1K_1Z_1$; पुरो ऽस्तित्वं M **2** ॰रन्यतः ] $MVK_1Z_1$; ॰रवृत्तः $A_1$(unmetrical) **4** ॰तीत्थं ] $K_1$; ॰तीदं $MVA_1Z_1$ **4** च ये वा पर्यनुयुञ्जते ] $MK_1Z_1$; च यो वा पर्यनुयुज्यते $M^{kha}V$; च एवापर्यनुयुज्यते $A_1$ **5** इदमप्यपरं हन्त ] $MA_1K_1Z_1$; इतरस्य परं हेतुस् $M^{kha}V$ **5** ते नः पर्यनुयुञ्जताम् ] em.; तेन पर्यनुयुज्यताम् M; तेन पर्यनुयुज्यते V; ते नः पर्यनुयुजातां $A_1$; ते नः पर्यनुयुज्यताम् $K_1$; ते नः पर्यनुयुंजते $Z_1$ **6** पिशङ्गो ] $MVK_1Z_1$; पिषंगो $A_1$ **6** ॰णाशनी ] $K_1$; ॰णाशिनी $MVA_1Z_1$ **7** पाण्डरः ] $MK_1Z_1$; पाण्डुरः $VA_1$ **8** यथा ] $MVK_1Z_1$; तथा $A_1$ **8** रूपादिसंबद्धा ] $MK_1Z_1$; रूपादिसंबन्धात् $M^{gha}A_1$; ऽरूपादिसंबन्धं V **8** सा ] $MA_1K_1Z_1$; न $M^{kha}V$ **9** ॰सन्ततिः ] $MVA_1Z_1$; ॰संतति $K_1$ **10** वा ] $MVA_1K_1$; तु $Z_1$ **10** प्रश्नो ] $MVA_1K_1Z_1^{pc}$; यत्नो $Z_1^{ac}$ **11** तदद्य ] $MVK_1Z_1$; तदन्यं $M^{gha}$; तदन्य॰ $A_1$ **12** ॰स्वभावस्य ] $MA_1K_1$; ॰स्वभावस्य(?) $M^{ka}$; ॰स्वभावेस्य V; ॰स्वभावो ऽस्य $Z_1$ **12** विदित्वाननुयोज्यताम् ] $VZ_1$; विधित्वाऽननुयोज्यताम् M; विदित्वानन्वयोज्यतां $A_1$; विदित्वाननुयोज्यता⊔ $K_1$

चोद्यचुञ्चुत्वमुत्सृज्य प्रतिपत्तिर्निरूप्यताम्॥

### [3.4 सामान्यमप्रत्याख्येयम्]

प्रतिपत्तिश्च विशेषेष्विव सामान्ये ऽपि निरपवादा दर्शितैव। तस्माद्विशेषवदप्रत्याख्येयं सामान्यम्।

### [3.4.1 सामान्यं प्रत्यक्षम्]

तत्रैतत्स्यात्। विशेषात्मन एव वस्तुनः सामान्यज्ञानजननशक्तियुक्तत्वात् किं सामान्यकल्पनयेति। तदयुक्तम्। विशेषवत्प्रत्यक्षत्वात् सामान्यस्य कः कल्पनार्थः। यदि हि कार्यानुमेयं सामान्यं कल्पयेम, तत एवमनुयुज्येमहि। कार्यस्यान्यथापि सिद्धेः किं तत्कल्पनयेति। प्रत्यक्षे तु सामान्ये को ऽयमनुयोगः।

---

**3 प्रतिपत्तिश्च ··· सामान्यम्** ] Quoted in *Śṛṅgāraprakāśa* 305.17–18.
**3 दर्शितैव** ] See section 2.
**6 विशेषात्मन एव ··· सामान्यकल्पनयेति** ] Cf. *Ślokavārttika ākṛti* 12: सामान्यबुद्धिशक्तत्वं विशेषेष्वेव यो वदेत्। विना वस्त्वन्तरात्, तेन वाच्या शक्तिस्तु कीदृशी॥

---

**1 चोद्यचुञ्चुत्व॰** ] $VA_1$; चोद्यचुन्चुत्व॰ M; ⊔द्यचुञ्चुत्व॰ $K_1$; चोद्यचञ्चुत्व॰ $Z_1$ **3 विशेषेष्विव** ] $MVA_1K_1$; विशेष्विव $Z_1$ **3 सामान्ये ऽपि** ] $K_1$; सामान्येषु च $MVA_1Z_1$ **3 निरपवादा** ] $MVA_1K_1$; निरपवाद $Z_1$ **6 तत्रै॰ ··· विषेषवत्** ] $MA_1K_1Z_1$; विशेषवत् $M^{kha}V$(eyeskip) **6 ॰जनन॰** ] $MA_1K_1$; ॰जन॰ $Z_1$ **7 ॰त् किं सा॰** ] $MA_1Z_1$; ⊔⊔⊔ $K_1$ **7 तदयुक्तम्** ] $MK_1$; तदुक्तं $A_1$; तदप्ययुक्तम् $Z_1$ **8 सामान्यस्य कः** ] $MVK_1Z_1$; सामान्य॰ $A_1$ **8 यदि हि** ] $MVA_1K_1$; यदि $Z_1$ **8 कल्पयेम** ] $MVK_1Z_1$; कल्पये $A_1$ **9 तत** ] $MVA_1Z_1$; त $K_1$ **9 कार्यस्यान्यथापि सिद्धेः** ] $A_1^{pc}K_1Z_1$; कार्यस्याप्यन्यथासिद्धेः MV; कार्यस्यान्याथापि सिद्धे $A_1^{ac}$ **10 सामान्ये** ] $MVK_1Z_1$; समान्ये $A_1$ **10 को** ] $MVA_1K_1Z_1^{pc}$; om. $Z_1^{ac}$ **10 ॰नुयोगः** ] $MVA_1Z_1$; ⊔⊔⊔ $K_1$

### [3.4.2 अनुवृत्तिज्ञानोत्पादिका शक्तिः]

का चेयमनुवृत्तिज्ञानोत्पादिका शक्तिः। विशेषेभ्यो व्यतिरिक्ताव्यतिरिक्ता वा नित्यानित्या वा तदाश्रिता स्वतन्त्रा वा प्रत्यक्षा परोक्षा वेति विकल्प्यमाना वाचोयुक्त्यन्तरेण जातिरेव कथिता भवति, न वा किंचिदिति यत्किंचिदेतत्।

### [3.4.3 विषयातिशयः]

ननु यथा गोत्वादिजातिर्नियतास्वेव व्यक्तिषु वर्तते नासामञ्जस्येन, तथा काभिश्चिदेव व्यक्तिभिः काचिद्गवादिबुद्धिर्जनयिष्यत इति।

---

**2 विशेषेभ्यो ··· यत्किंचिदेतत्** ] Cf. *Ślokavārttika ākṛti* 13–18: ग्राह्या किं वाप्यसंवेद्या भिन्नैका वा तथैव च। गृह्यते यदि सैका च जातिरेवान्यशब्दिका॥ भवेन्निर्विषया बुद्धिर्यदि शक्तिर्न गृह्यते। न हि सद्भावमात्रेण विषयः कश्चिदिष्यते॥ परस्परविभिन्नत्वाद् विशेषा नैकबुद्धिभिः। गृह्यन्ते, विषयासत्त्वाच्छक्तिश्चैषां न विद्यते॥ भिन्नत्वे वापि शक्तीनामेकबुद्धिर्न लभ्यते। विशेषशक्त्यभेदे च तावन्मात्रमतिर्भवेत्॥ भिन्ना विशेषशक्तिभ्यः सर्वत्रानुगतापि च। प्रत्येकं समवेता च तस्माज्जातिरपीष्यताम्॥ तेनात्मधर्मो भेदानामेकधीविषयो ऽस्ति यः। सामान्यमाकृतिर्जातिः शक्तिर्वा सो ऽभिधीयताम्॥
**2 विशेषेभ्यो व्यतिरिक्ताव्यतिरिक्ता वा** ] *Nyāyamañjarīgranthibhaṅga* 135.18: विशेषेभ्यो व्यतिरिक्ताऽव्यतिरिक्ता वेति।
**3 नित्यानित्या वा** ] *Nyāyamañjarīgranthibhaṅga* 135.19: नित्याऽनित्या वेति।
**3 तदाश्रिता स्वतन्त्रा वा** ] *Nyāyamañjarīgranthibhaṅga* 135.21–23: [तदाश्रिता स्वतन्त्रा वा]। तदाश्रितत्वपक्षे जातिरेव नामान्तरेणोक्ता। स्वातन्त्र्यपक्षे विषयनियमेन प्रत्ययानुत्पत्तिप्रसङ्गः, गव्यनाश्रिता चेत् सा शक्तिः कथं तत्रैव प्रत्ययविशेषं जनयेत्।

---

**2 का** ] MV$A_1Z_1$; सा $K_1$   **2 शक्तिः** ] MV$K_1Z_1$; शक्ति $A_1$   **2 व्यतिरिक्ता°** ] MV$Z_1$; om. $A_1K_1$   **3 नित्यानित्या वा तदाश्रिता स्वतन्त्रा वा प्रत्यक्षा परोक्षा** ] V$K_1$; नित्यानित्या M; नित्या वा तदाश्रिता स्वतंत्रा वा प्रत्यक्षे (तु समान्ये को यमनुयोग) परोक्षा $A_1$; नित्या तदाश्रिता स्वतन्त्रा वा प्रत्यक्षा परोक्ष $Z_1$   **8 नासामञ्जस्येन** ] MV; नासमञ्जस्येन $A_1Z_1$; नसामञ्जस्येन $K_1$   **8 काभिश्चिदेव** ] MV$A_1K_1$; काश्चिदेव $Z_1$   **8 °र्जनयिष्यत** ] $K_1$; °र्जन्यत MV$A_1Z_1$

नैतदेवम्, विषयातिशयव्यतिरेकेण प्रत्ययातिशयानुपपत्तेः। उपायातिशये तु प्रत्ययातिशयोपकारिणीष्यमाणे विषयातिशयं प्रति को द्वेषः। सिद्धे च विषयातिशये दुरपह्नवं सामान्यम्।

### [3.4.4 सामान्येष्वनुवृत्तिबुद्धिः]

ननु चानुवृत्तिबुद्धिर्विनापि सामान्यान्तरेण सामान्येषु दृश्यत एवेति को ऽत्र विस्रम्भः।

उच्यते। न चाषेण पञ्चाशद् भवितुमर्हति। यदि हि सेनावना-

---

**5 ननु ⋯ विस्रम्भः** ] Cf. *Ślokavārttika ākṛti* 19: ननु भिन्ने ऽपि सत्तादौ सामान्यमिति जायते। बुद्धिर्विनापि सामान्यादन्यस्मात्, सा कथं भवेत्॥; *Nyāyamañjarī* II 10.10–12: तथा च परपरिकल्पितेषु सत्तादिसामान्येष्वपि सामान्यमित्यनुवृत्तविकल्पाः प्रवर्तन्त एव। न च सामान्येषु सामान्यान्तराणि संभवन्ति "निःसामान्यानि सामान्यानि" इत्यभ्युपगमात्।; *Pramāṇasamuccaya* V 11 (Harada [1984]): नैतज्जातेरजातितः।

**7 न चाषेण पञ्चाशद् भवितुमर्हति** ] *Nyāyamañjarī* II 636.13–14: न च तत्सामान्यादत्रापि तथास्त्विति वक्तव्यम्। न हि चाक्षुषेण पंचाशद्भवितुमर्हति।; GOML R3583(SR1712) f.120r4 reads the last line as follows: न हि चाषेण पञ्चाषद्भवितुमर्हति।

**7 यदि हि ⋯ भवितव्यम्** ] Cf. *Ślokavārttika ākṛti* 20: वनोपन्यासतुल्यो ऽयमुपन्यासः कृतस्त्वया। भ्रान्तित्वेन हि नैतस्या भ्रान्तिर्गोत्वादिधीरपि॥

---

**1 नैतदेवम्** ] MVA$_1$K$_1$; नैवमेतत् Z$_1$ **2 °तिशये तु ⋯ विषयातिशयं प्रति** ] MVZ$_1$; °तिशयं प्रति A$_1$(eyeskip); °तिशयेति ⋯ विषयं प्रति K$_1$ **2 प्रत्ययातिशयोप°** ] VZ$_1$; प्रत्ययातिशय° M; प्रत्य⊔⊔⊔⊔⊔ K$_1$ **2 विषयातिशयं** ] MVZ$_1$; विषयं K$_1$ **3 द्वेषः** ] MVA$_1$Z$_1$; दोषः K$_1$ **3 दुरपह्नवं** ] MVA$_1$Z$_1$; दुरुपह्नवं K$_1$ **5 ननु चानुवृत्तिबुद्धि°** ] MA$_1$; ननु वृत्ति° M$^{kha}$V; ननु चानुवृत्तबुद्धि° K$_1$; नन्ववृत्तिबुद्धि° Z$_1$ **5 सामान्येषु** ] VZ$_1$; सामान्यान्तरेषु MA$_1$; सामान्यषु K$_1$ **5 दृश्यत एवेति** ] MVK$_1$Z$_1$; दृश्यत इति A$_1$ **7 उच्यते** ] MA$_1$K$_1$; om. VZ$_1$ **7 चाषेण** ] A$_1$; चाशेषेण MVZ$_1$; चाशेन K$_1$ **7 पञ्चाशद्** ] MVA$_1$Z$_1$; पञ्च षद् K$_1$

दिप्रत्ययाः करितुरगधवखदिरादिव्यतिरिक्तमर्थमनपेक्ष्य जायमाना मिथ्या भवन्ति, किमेतावता घटादिप्रत्ययैरपि मिथ्या भवितव्यम्। बाधकसदसद्भावनिबन्धना हि वैतथ्यावैतथ्यस्थितिः प्रत्ययानाम्।

तत्र सत्तादौ सामान्यान्तरविरहान्मिथ्या तत्प्रत्यय उपाधिना केनचित्प्रवर्तते, न त्वेवं गवादाविति यत्किंचिदेतत्। तदुक्तम्—

तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धनः।
सामान्यशब्दः सत्तादावेकधीकरणेन वा॥ इति।

## [3.4.5 एकप्रत्यवमर्शस्य हेतुत्वम्]

नन्विहाप्येकार्थक्रियाकारित्वाद्युपाधिनिबन्धन एकाकारप्रत्ययः से-

---

**4** तत्र सत्तादौ ··· यत्किंचिदेतत् ] Cf. *Ślokavārttika ākṛti* 21ab: शब्दात् पूर्वं हि सर्वेषां गवादाविव नैकधीः।

**5** उपाधिना केनचित्प्रवर्तते ] *Nyāyamañjarī* II 10.13: औपाधिक एष सामान्येष्वनुगतविकल्प इति चेत्।

**6** तस्मादे° ··· °करणेन वा ] *Ślokavārttika ākṛti* 24

**7** °वेकधीकरणेन वा ] *Nyāyamañjarīgranthibhaṅga* 135.24: एकधीकरणेन वेति।

---

**1** यदि हि सेनावनादि° ] $MVZ_1$; यदि हि संभावनादि° $M^{ka}A_1$; य␣␣␣␣␣नादि° $K_1$ **1** प्रत्ययाः ] $MVK_1Z_1$; प्रत्यया एव $A_1$ **1** करितुरगधवखदिरादि° ] $MVK_1Z_1$; खदिरादि° $A_1$ **3** °सदसद्भाव° ··· °स्थितिः ] $MA_1K_1Z_1$; °सद्भावनिबन्धनं हि वैतथ्यं $M^{kha}V$ **3** °नाम्। तत्र सत्तादौ ] $MVZ_1$; °नां तत्रादौ $A_1$; ␣␣␣सत्तादौ $K_1$ **4** सामान्या° ] $MA_1K_1Z_1$; समान्या° $V$ **4** °थ्या तत्प्रत्यय ] $A_1K_1$; °थ्याप्रत्यया $M$; °थ्या प्रत्ययाः $V$; °थ्या तत्प्रत्यया $Z_1$ **5** °वर्तते ] $K_1$; °वर्तन्ते $MVA_1Z_1$ **5** गवादाविति ] $MVK_1Z_1$; गवादिविति $A_1$ **5** तदुक्तम् ] $MA_1K_1Z_1$; यदुक्तम् $M^{ka}V$ **6** °देकस्य ] $MVK_1Z_1$; °देकस्या $A_1$ **7** सत्ता° ] $MVK_1Z_1$; सत्त° $A_1$ **9** °ति। नन्विहा° ] $MVZ_1$; °ति न त्वमिहा° $A_1$; ␣␣न्वेवमिहा° $K_1$ **9** °त्वाद्युपाधि° ] $K_1$; °त्वोपाधि° $MVA_1Z_1$ **9** एकाकार° ] $MVK_1Z_1$; एकाकारः $A_1$

त्स्यतीत्युक्तम्। सत्यमुक्तमयुक्तं तु, एकार्थक्रियाकारित्वस्यैवासिद्धेः। यत्तूक्तम्—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।

इति, तदसांप्रतम्।

[3.4.5.1 प्रत्यवमर्शस्यानेकत्वम्]

प्रत्यवमर्शस्याप्येकत्वानुपपत्तेः। न हि बहुभिर्दर्शनैरेको विकल्पः संभूय साध्यते, अपि तु नानादर्शनानन्तरं तत्सामर्थ्यलब्धजन्मानो विकल्पा अपि भेदेनैवोल्लसन्ति। न च तेषां किमपि कार्यान्तरमस्ति,

---

**1 °त्युक्तम्** ] *Nyāyamañjarī* II 10.13–15: आयुष्मन्। गवादिष्वपि कंचिदुपाधिविशेषमवलम्ब्य गौर्गौरित्यनुस्यूतविकल्पो भविष्यति।; cf. *Pramāṇavārttika* I 73: एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने। भेदे ऽपि नियताः केचित् स्वभावेनेन्द्रियादिवत्॥

**1 एकार्थक्रियाकारित्वस्यैवासिद्धेः** ] *Nyāyamañjarī* II 11.10: ननु तथा मा भूत्। न त्वभिन्नमेव खण्डमुण्डयोः कार्यम्।

**2 यत्तूक्तम्** ] *Nyāyamañjarī* II 11.13–12.4: ननु दर्शनमपि प्रतिव्यक्ति भिन्नमेव। सत्यम्। स्वपृष्ठभाविप्रत्यवमर्शाख्यकार्यैक्यादेकमित्युच्यते। यथैव शाबलेयादिपिण्डदर्शने सति गौरित्यनन्तरमवमर्शः, तथैव बाहुलेयपिण्डदर्शने ऽपि गौरित्येवावमर्श इति तदेकत्वमुच्यते। तदुक्तम्—एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी। एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता॥ (*Pramāṇavārttika* I 109) इति। तस्मादौपाधिकत्वादनुवृत्तबुद्धेर्न सामान्यं किंचिद्वास्तवमस्तीति।

**6 प्रत्यवमर्शस्याप्येकत्वानुपपत्तेः** ] Dharmottara's *Apohaprakaraṇa* 248.9–11: de ltar ni mi nus te/ ji ltar gsal ba rnams daṅ mthoṅ ba rnams tha dad pa de bźin du mthoṅ ba'i mthu las byuṅ ba'i rnam par rtog pa rnams kyaṅ tha dad do/

---

**1 °क्तमयुक्तं** ] $MVK_1Z_1$; °क्तं युक्तं $A_1$ **2 यत्तूक्तम्** ] $MVK_1Z_1$; यदुक्तं $A_1$ **4 इति, तदसां°** ] $A_1Z_1$; इति तदप्यसां° M; तदसाम्° V; इति तद⊔⊔ $K_1$ **6 °स्याप्येकत्वा°** ] $MVK_1Z_1$; °स्यार्थकत्वा° $A_1$ **7 °नन्तरं** ] $MVK_1Z_1$; °नन्तर° $A_1$ **7 °लब्ध°** ] $MVK_1Z_1$; °लक्ष° $A_1$ **8 अपि** ] $MA_1K_1$; अपि तु $VZ_1$

येन त एकतामधिगच्छेयुः।

[3.4.5.2 विकल्पैकत्वग्रहणहेतुः]

केन च विकल्पानामेकत्वं गृह्यते। न दर्शनेन, तस्य दृश्यविषयत्वात्। न विकल्पान्तरेण, सर्वविकल्पानामारोपितार्थपर्यवसितत्वेन स्वाकारविषयत्वेन वा परस्परभेदाभेदपरिच्छेदसामर्थ्यासंभवात्।

[3.4.5.3 नाकारस्यैकत्वम्]

ब्रूयात्। विकल्पोल्लिख्यमानाकारभेदानवगमाद्विकल्पानामैक्यम्। यादृश एवैकशाबलेयादिस्वलक्षणदर्शनानन्तरभुवापि विकल्पेनोल्लिखित आकारो गौरिति, तादृगेव गोपिण्डान्तरदर्शनानन्तरजन्मनापीति

---

**3 केन ··· गृह्यते** ] Dharmottara's *Apohaprakaraṇa* 248.18–23: de la rnam par rtog pa rnams kyi gcig pa ñid la rnam par rtog pa de ñid kyis ni reg par mi nus so// ... rnam par rtog pa gźan gyis kyaṅ mthoṅ bas bskyed pa'i rnam par rtog pa rnams bzuṅ bar tha dad pa ma yin no//

**8 यादृश ··· °दैक्यमुच्यते** ] Dharmottara's *Apohaprakaraṇa* 249.9–12: 'di ltar śiṅ mthoṅ ba las byuṅ ba'i rnam par rtog pa gcig gis don ci 'dra ba sgro btags pa de 'dra bar gźan gyis kyaṅ yin pa'i phyir śiṅ mthoṅ bas byas pa'i rnam par rtog pa rnams don mtshuṅs par źen par byed pa yin no/

---

**1 येन त** ] MV$K_1Z_1$; येन $A_1$ **1 °मधिगच्छेयुः** ] MV$A_1K_1$; °मुपगच्छेयुः $Z_1$ **3 तस्य** ] MV$A_1K_1$; तस्य च $Z_1$ **4 दृश्यविषयत्वात्** ] MV$K_1Z_1$; विषयत्वात् $M^{ka}A_1$ **4 °विकल्पाना°** ] M$A_1K_1Z_1$; °विकल्पिताना° $M^{kha}$V **5 °भेदपरिच्छेद° ··· °कारभेदा°** ] MV$A_1K_1$; om. $Z_1$(eyeskip) **7 विकल्पोल्लिख्य°** ] MV$K_1$; विकल्पाल्लिख्य° $A_1$ **8 यादृश एवै°** ] M$A_1K_1$; यादृशमेवै° V$Z_1$ **8 °दर्शनानन्तर°** ] $A_1K_1$; °दर्शनान्तर° MV$Z_1$ **8 °भुवापि** ] MV$A_1Z_1$; °भुवा $K_1$ **9 आकारो** ] MV$K_1Z_1$; --कारो $A_1$ **9 तादृगेव** ] $K_1Z_1$; तादृश एव गो° M; तादृशमेव गो° V; तादृगेव गो° $A_1$ **9 °दर्शनानन्तर°** ] $M^{gha}A_1K_1Z_1$; °दर्शनान्तर° MV

विषयाभेदात्तदैक्यमुच्यते। तदुल्लिख्यमाने हि विषये भेदो न प्रतिभासत इत्यत एष विकल्पो भिन्नान्यपि दर्शनानि मिश्रीकरोति, दर्शनोपारूढस्य भेदस्याग्रहणादिति।

तदेतदपि न हृदयंगममभिधीयते। विकल्पास्तावद्विज्ञानादविलक्षणस्वभावत्वादन्योन्यं भिन्ना एव भवन्ति।

यस्तु विकल्पोल्लिखित आकारो ऽनुपलभ्यमानभेदः, स तेभ्यो व्यतिरिक्तो ऽव्यतिरिक्तो वा। व्यतिरिक्तश्चेत्, सामान्यमेवेदं नामान्तरेणोक्तं भवति। अवास्तवत्वकृतो विशेष इति चेत्, न, अवास्तवत्वे युक्त्यभावात्।

---

**1** तदुल्लिख्यमाने हि विषये भेदो ] *Nyāyamañjarīgranthibhaṅga* 136.1: तदुल्लिख्यमाने हि विषयभेद इति। ततो भेदाप्रतिभासादेव विषयाभेदः, तस्माच्च विकल्पैक्यमित्यतः 'केन विषयाणामैक्यं गृह्यते' इति न वाच्यम्।
**2** मिश्रीकरोति ] *Nyāyamañjarīgranthibhaṅga* 136.2–3: मिश्रीकरोत्येकतया व्यवस्थापयति।
**3** दर्शनोपारूढस्य भेदस्याग्रहणादिति ] *Nyāyamañjarīgranthibhaṅga* 136.5–7: दर्शनोपारूढस्य भेदस्याग्रहणादिति। दर्शनविषयस्य सर्वस्यैव विकल्पैरेकतयाऽध्यवसीयमानत्वाद् दृश्यभेदनिबन्धनस्य दर्शनभेदस्याग्रहणादभेद एवावतिष्ठत इत्यर्थः।
**9** अवास्तवत्वे युक्त्यभावात् ] *Nyāyamañjarīgranthibhaṅga* 136.8: अवास्तवत्वे युक्त्यभावाद्।

---

**1** विषया॰ ] $MVK_1$; विषय॰ $M^{ka}A_1Z_1$ **1** ॰ख्यमाने हि ] $MK_1$; ॰ख्यमाने ऽपि V; ॰ख्यमाने पि हि $A_1Z_1$ **1** ॰ये भेदो ] $MK_1$; ॰ये बोधो $M^{ka}$; ॰यभेदो हि V; ॰यो वोधो $A_1$; ॰ये भेदो हि $Z_1$ **2** एष ] $MVK_1Z_1$; एव $A_1$ **3** दर्शनोपारूढस्य भेद॰ ] $MVK_1Z_1$; दर्शनापोहं च भेद॰ $M^{ka}$; दर्शनापोहं चंद॰ $A_1$ **5** ॰ज्ञानादविलक्षण॰ ] $K_1$; ॰ज्ञानक्षण॰ $MVZ_1$; ॰ज्ञानलक्षण॰ $M^{ka}A_1$ **5** ॰स्वभावत्वा॰ ] $MVA_1K_1$; ॰स्वभावा॰ $Z_1$ **6** आकारो ऽनुप॰ ] $MVK_1Z_1$; आकारोप॰ $M^{ka}A_1$ **6** स तेभ्यो ] $MA_1K_1Z_1$; तेभ्यो $M^{kha}V$ **7** ऽव्यतिरिक्तो ] $MVK_1$; om. $A_1$; ऽतिरिक्तो $Z_1$ **7** व्यतिरिक्तश्चेत् ] $MA_1K_1Z_1$; व्यतिरिक्तश्चेत्स्यात् V **8** अवास्तवत्व॰ ] $MVK_1Z_1$; अवातक्ष्म॰ $A_1$ **9** अवास्तवत्वे ] $MVK_1Z_1$; वास्तवत्वे $A_1$

अव्यतिरिक्तश्चेत्स आकारः, तर्हि विकल्पस्वरूपवद्भिद्यत एवेति कथं तदैक्यम्। कथं वा तदैक्येन भिन्नानामपि दर्शनानां मिश्रीकरणमवकल्पते।

[3.4.5.4 इतरेतराश्रयम्]

अपि च, रे मूढ, सामान्यानभ्युपगमे कुतस्त्य एकाकारविकल्पोत्पाद इति पर्यनुयुक्तेन त्वया कार्यैक्यादित्युत्तरमुक्तम्। कार्यैक्यं कुत इति च पृष्टेन विकल्पैक्यादित्युच्यते, तदेतदितरेतराश्रयं भवति— कार्यैक्याच्च विकल्पैक्यं विकल्पैक्याच्च कार्यैक्यमिति।

विकल्पैक्यमेव कार्यैक्यमिति तु सुतरामनुत्तरम्। विकल्पैक्यं वि-

---

**1 अव्यतिरिक्तश्चेत्स ⋯ तदैक्यम्** ] Cf. Dharmottara's *Apohaprakaraṇa* 241.5–6: śes pa daṅ tha mi dad pa'i phyir gzugs brñan raṅ gi mtshan ñid yin yaṅ sgra'i brjod byar yoṅs su brtags par ji ltar 'gyur te/
**6 कार्यैक्यादित्युत्तरमु॰** ] *Nyāyamañjarīgranthibhaṅga* 136.8–9: कार्यैक्यादित्युत्तरमिति। कार्यैक्यादेककार्यकारित्वाद्।
**9 विकल्पैक्यमेव कार्यैक्यमि॰** ] *Nyāyamañjarīgranthibhaṅga* 136.9–10: विकल्पैक्यमेव कार्यैक्यमिति। योऽयं विषयाभेदेन विकल्पोत्पादस्तदेव कार्यैक्यम्।

---

**1 ॰द्भिद्यत** ] $MVK_1Z_1$; ॰द्विद्यत $A_1$ **2 कथं** ] $MVA_1K_1$; कथ $Z_1$ **2 कथं वा** ] $MVA_1Z_1$; कथन् $K_1$ **2 तदैक्येन** ] $MK_1$; तदैक्ये $VA_1Z_1$ **5 ॰नभ्युपगमे** ] $MVA_1K_1$; ॰नभ्युगमे $Z_1$ **5 कुतस्त्य** ] $MVK_1Z_1$; कुतस्य $A_1$ **6 ॰विकल्पोत्पाद इति ⋯ विकल्पैक्यादित्युक्तं** ] $K_1Z_1$; ॰विकल्पोत्पादः? ⋯ विकल्पैक्यादेवेत्युक्तं M; ॰विकल्पोत्पादः? इति पर्यनुयुक्तेन त्वया, यदि कार्यैक्यादिकल्पैक्यादेवेत्युक्तं $M^{kha}$; ॰विकल्पोत्पाद इति पर्यनुयुक्तेन त्वया कार्यैक्याद् विकल्पैक्यादेवेत्युक्तं V; पृष्टेन वैकल्पैक्यादित्युच्यते तदेतदितरेतराश्रयं भवति कार्यैक्याच्च कार्यैक्यमिति विकल्पैक्यं कार्यैक्यमिति तु सुतरामनंतरं विकल्पैक्यं विकल्पैक्यादेवेत्युक्तं $A_1$ **7 कार्यैक्यादित्युत्तरमुक्तम्। कार्यैक्यं कुत इति च पृष्टेन** ] $Z_1$; यदि M; कार्यैक्याद्युत्तरमुक्तं कार्यैक्यं कुत इति च पृष्टे $K_1$ **7 तदेतदितरेतरा॰** ] $A_1$; तदेतरेतरा॰ M; तदेतदितरा॰ $K_1$; तदिदमितरेतरा॰ $Z_1$ **8 कार्यैक्याच्च** ] $MA_1$; कार्यैक्याद् $K_1Z_1$ **8 विकल्पैक्यं विकल्पैक्याच्च** ] $MK_1Z_1$; om. $A_1$ **8 कार्यैक्यमिति** ] $MA_1K_1$; om. $Z_1$ **9 विकल्पैक्यमेव** ] $K_1Z_1$; विकल्पैक्यं $MA_1$ **9 तु** ] $MA_1K_1$; om. $Z_1$ **9 सुतरामनुत्तरम्** ] $K_1Z_1$; सुतराम्, अनन्तरं $MA_1$

कल्पैक्यादित्युक्तं भवति। कथं चैवमनुन्मत्तो ब्रूयात्।

[3.4.5.5 उपसंहारः]

तस्मात्—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।
इति व्यामूढभाषितम्।

[3.5 एकस्यार्थस्वभावस्य]

यदपि विकल्पानां शब्दानां चान्यापोहविषयत्वसिद्धये प्रलपितम् "एकस्यार्थस्वभावस्य" इत्यादि, तदपि यत्किंचित्।

[3.5.1 गृहीतस्य ग्रहणं युज्यते]

सर्वात्मना हि दृष्टो ऽर्थः पुनर्न हि न दृश्यते।
प्रदर्शितं हि प्रामाण्यं गृहीतग्राहिणामपि॥
क्षणभङ्गे निरस्ते च देशकालादिभेदतः।
गृहीतस्यापि भावस्य ग्रहणं न न युज्यते॥

[3.5.2 कश्चिद्धर्मो गृह्यते]

अपि चास्मन्मते भिन्नैर्धर्मैर्युक्तस्य धर्मिणः।
धर्मो ऽस्य केनचित्कश्चित्प्रत्ययेन ग्रहीष्यते॥

---

**7** प्रलपितम्] *Nyāyamañjarī* II 13.13–15: तथा हि न विकल्पा वस्तु स्पृशन्ति। कुतः। एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्। को ऽन्यो न दृष्टो भागः स्याद् यः प्रमाणैः परीक्ष्यते॥ (*Pramāṇavārttika* I 43)
**11** प्रदर्शितं] *Nyāyamañjarī* I 56.5–7: यदपि प्रमाणविशेषणमनधिगतार्थग्राहित्वमभिधीयते परैः, तदपि न सांप्रतम्, प्रमाणस्य गृहीततदितरविषयप्रवृत्तस्य प्रामाण्ये विशेषाभावात्।

---

**1** °दित्युक्तं] $K_1Z_1$; °देवेत्युक्तं $MVA_1$ **8** °भावस्य" इत्यादि] $MVA_1Z_1$; °भावस्योत्यादि $K_1$ **8** यत्किंचित्] $VK_1Z_1$; यत्किंचिदेतत् $MA_1$ **10** °त्मना हि] $MVA_1Z_1$; °त्मनापि $K_1$ **11** हि] $MVA_1K_1$; च $Z_1$ **12** °भेदतः] $MVA_1Z_1$; °भेदिना $K_1$ **16** धर्मो ऽस्य] $MVK_1Z_1$; धर्मस्य $M^{ka}A_1$

विचित्रसहकार्यादिशक्तिभेदाच्च धर्मिणः।
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मता कुतः॥

### [3.5.3 वैफल्यं न कल्पनाहेतुः]

यदि च नाम निर्विकल्पकेन सर्वात्मना परिच्छिन्नं वस्तु पुनः परिच्छिन्दन्ति विकल्पान्तराणि वैफल्यमश्नुवीरन्, किमेतावता तेषामप्रतीयमानार्थग्राहिता कल्पयितुं शक्यते। न हि विरतपिपासस्य हिमकरकपटलमफलमिति तदेव रजतमिति कल्पयितुं पार्यते। तस्माद् दुराशामात्रमेतत्।

## [4 बौद्धमतदूषणम्]

### [4.1 निषेधात्मान्यापोहनिरासः]

इत्थं चान्यापोहे निषेधात्मनि बाह्ये विकल्पानां शब्दानां च विषय इष्यमाणे भट्टकुमारिलोपन्यस्तदुस्तरदूषणासारवारणकारणं न

---

**1** विचित्रसहकार्यादि° ] *Nyāyamañjarīgranthibhaṅga* 136.11: विचित्रसहकार्यादीति।
**2** नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मता ] *Pramāṇavārttika* I 52–53ab: यस्यापि नानोपाधेर्धीर्ग्राहिकार्थस्य भेदिनः। नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे॥ सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः।
**11** इत्थं चान्यापोहे निषेधात्मनि बाह्ये ] *Nyāyamañjarīgranthibhaṅga* 136.17: इत्थं चान्यापोह इति निषेधात्मनि बाह्य इति चिरन्तनबौद्धदृष्ट्या।
**12** °दूषणासार° ] *Nyāyamañjarī*, Kataoka [2008:19.2]: नन्वपोहशब्दार्थपक्षे महतीं दूषणवृष्टिमुत्ससर्ज भट्टः।

---

**1** °भेदाच्च ] $K_1$; °भेदश्च $MVA_1Z_1$ **2** °शक्त्य° ] $VA_1$; °शक्य° $MK_1$; °शक्ति° $Z_1$ **7** हिमकरकपटल° ] em.; हिमकरपटल° $MVK_1$; हिमकरकरपटल° $A_1Z_1$ **7** तदेव ] $MVA_1Z_1$; तदेकं $K_1$ **7** पार्यते ] $K_1$; पार्यताम् $MVZ_1$; पादनां $A_1$ **11** चान्यापोहे ] $K_1$; चान्यापोह° $MVA_1Z_1$ **11** निषेधात्मनि ] $MA_1K_1Z_1$; °निरात्मनि $M^{kha}V$ **12** भट्टकुमारिलो° ] $MVZ_1$; भज--सारिरिलो° $A_1$; भट्टकुमारिळो° $K_1$ **12** °दूषणासारवारणकारणं ] $MA_1Z_1$; °दूषणानामुद्धरणकरणं $M^{kha}$; °दूषणानां न वारणकरणम् $M^{ga}$; °दूषणानामावरणकरणं $V$; °दूषणासारवारणन् $K_1$ **12** न ] $VK_1Z_1$; न हि $MA_1$

किंचिदुत्पश्यामः।

[4.2 आरोपिताकारनिरासः]

यदपि दूषणापनिनीषया विकल्पप्रतिबिम्बकम् आरोपिताकारमात्रं व्यावृत्तिच्छायोपरक्तं किमपि परिकल्पितम्, तदपि न व्यवहारपदवीमवतरितुमुत्सहते।

विकल्पो नाम बोधात्मा स च स्वच्छः स्वभावतः।
नासावितरसंपर्कादृते कलुषतामियात्॥
नूनमभ्युपगन्तव्यं किंचिदस्योपरञ्जकम्।
आन्तरं वासनारूपं बाह्यं वा विषयात्मकम्॥
यत्पुनर्विद्यते नान्तर्न बहिस् तेन रज्यते।
विज्ञानमिति मायैषा महती धूर्तनिर्मिता॥
विषया एव बुद्धीनामाञ्जस्येनोपरञ्जकाः।

---

**3** यदपि ··· परिकल्पितम्] *Nyāyamañjarī*, Kataoka [2009:27.8]: आरोपितं किञ्चिदाकारमात्रं विकल्पोपरञ्जकम्; Kataoka [2009:34.10–35.1]: सो ऽयं नान्तरो न बाह्यः, अन्य एव कश्चिदारोपित आकारो व्यावृत्तिच्छायायोगादपोहशब्दार्थ उच्यते।

---

**1** °दुत्पश्यामः] $MA_1K_1Z_1$; °त्पश्यामः V **3** दूषणा°] $K_1Z_1$; तद्दूषणा° $MVA_1$ **3** °मात्रं] $A_1K_1Z_1$; °मात्र° MV **4** व्यावृत्ति°] $MVA_1Z_1$; बाह्य° $K_1$ **5** °मवतरितु°] $MVK_1$; °मवतर्रत° $A_1$; °मवतरीतु° $Z_1$ **6** स्वच्छः] $MVA_1Z_1$; स्वच्छ° $K_1$ **7** नासा°] $MVK_1Z_1$; रामा° $M^{ka}A_1$ **7** °वितरसंपर्का°] $MVK_1Z_1$; °विरनसम्पका° $A_1$ **7** कलुष°] $MVK_1$; कलषि° $A_1$; कलुषि° $Z_1$ **7** °तामियात्] $MVK_1Z_1$; °तामियाम् $A_1$ **8** नूनमभ्युपगन्तव्यं] $MVK_1Z_1$; रूप नूनम--पगंतव्यं $A_1^{ac}$; नूनम--पगंतव्यं $A_1^{pc}$ **8** किंचिदस्योपरञ्जकम्] $MVZ_1$; किंचि--पस्तवना $A_1$; किंचिदस्योप⊔⊔कं $K_1$ **10** नान्तर्न] $MVK_1$; ना-- $A_1$; नान्तर् $Z_1$(unmetrical) **12** बुद्धी°] $MVK_1Z_1$; -- $A_1$ **12** °नामाञ्जस्येनोपरञ्जकाः] $MVZ_1$; °नामंजनस्य नोपरंजकाः $A_1$(unmetrical); °नामांजस्येवोपरञ्जना $K_1$

वासना विषयज्ञानजन्यत्वान्न तथोदिताः॥

तस्मात्तत्र देशान्तरादौ सता केनचिदर्थेन बुद्धयो रज्यन्ताम्। एकान्तेनासता केनचिदारोपितेन तदुपरञ्जनमघटमानं मनोरथप्रायम्। न चैकान्तासन्नाकार आरोपयितुं शक्यते।

[4.3 न विकल्पस्य व्यावृत्तिमात्रविषयत्वम्]

अपि च दर्शनपृष्ठभाविनो विकल्पास्तद्व्यापारानुकारिणो व्यावृत्तं स्प्रष्टुमसमर्था व्यावृत्तिमात्रमवलम्बन्त इति यदुच्यते, तत्र दृश्यस्य सजातीयविजातीयव्यावृत्तत्वाद् उभय्यपि व्यावृत्तिरस्तीति तां स्पृशन्तो विकल्पाः कथं सजातीयव्यावृत्तिमपाकृत्य विजातीयव्यावृ-

---

**1** वासना विषयज्ञान° ] *Nyāyamañjarīgranthibhaṅga* 136.19: वासना विषयज्ञानेति।

**1** तथोदिताः ] *Nyāyamañjarīgranthibhaṅga* 136.19: तथोदिता उपरञ्जकत्वे ···

**7** यदुच्यते ] *Nyāyamañjarī*, Kataoka [2009:28.1–3]: व्यावृत्तं हि वस्तु दर्शनानां विषयः, तच्च स्प्रष्टुमक्षमा विकल्पा इत्युक्तम्। अथ तच्छायामवलम्बमाना विकल्पा व्यावृत्तस्याग्रहणाद् व्यावृत्तिविषया उच्यन्ते।

---

**1** °त्वान्न तथोदिताः ] MV$A_1Z_1$; °त्वात्तृतये⊔⊔ $K_1$ **2** देशान्तरादौ ] MV$K_1Z_1$; तदेशातरमादौ $A_1$ **2** सता ] $K_1$; वसता MV$A_1Z_1$ **3** एकान्तेनासता ] $K_1$; एकान्तासता तु MV$Z_1$; एकांमानापता तु $A_1^{ac}$; एकांनापता तु $A_1^{pc}$ **3** °घटमानं ] MV$Z_1$; °पटमानं $A_1$; °घटमान° $K_1$ **4** °सन्नाकार ] MV$Z_1$; °स⁻⁻कार $A_1$; °सन्ताकार $K_1$ **4** आरोपयितुं ] $K_1$; आरोपयितुमपि MV$A_1Z_1$ **6** °पृष्ठभाविनो ] MV$K_1Z_1$; °पृष्टभाविदादोपितेनो $A_1^{ac}$; °पृष्टभाविनो $A_1^{pc}$ **6** °रानुकारिणो ] $K_1$; °रकारिणो MV$A_1Z_1$ **7** स्प्रष्टु° ] M$K_1Z_1$; स्रष्टु° V; प्रष्टु° $A_1$ **7** °लम्बन्त ] MV$A_1K_1$; °लम्बत $Z_1$ **7** दृश्यस्य सजातीयविजातीय° ] M$K_1Z_1$; दृश्यस्य सजातीय° $M^{ka}A_1$; दृश्यसजातीयविजातीय° $M^{kha}$V **8** उभय्यपि व्यावृत्तिरस्तीति तां स्पृशन्तो विकल्पाः कथं सजातीयव्यावृत्तिमपाकृत्य विजातीय° ] $K_1$; उभयव्यावृत्तिरस्तीति, तां स्पृशन्तो विकल्पाः कथं विजातीय° M; उभये ऽपि $M^{kha}$V(eyeskip); उभयव्यावृत्तिरस्तीति तां स्पृशंतो विकल्पाः कथं सजातीय° $A_1$; उभय्यपि व्यावृत्तिरस्तीति स्पृशन्तो विकल्पाः कथं सजातीयव्यावृत्तिमपकृष्टविजातीय° $Z_1^{ac}$; उभय्यपि व्यावृत्तिरस्तीति स्पृशन्तो विकल्पाः कथं सजातीयव्यावृत्तिमपकृष्टविजातीय° $Z_1^{pc}$

त्तिमेव स्पृशेयुः।

उभयावमर्शे सत्येषां पौनरुक्त्यादानर्थक्यमिति चेत्। नानर्थक्यम्। प्रमाणवर्गे निपतन्तः काममनर्थका भवन्तु, अर्थान्तरं वालम्बन्ताम्। व्यावृत्तिं त्ववलम्बमाना अंशत आलम्बन्ते अंशतो नेति न श्रद्दध्महे।

सजातीयविजातीयव्यावृत्त्योर्न च भिन्नता।
यतो ऽन्यतरसंस्पर्शो विकल्पानां प्रकल्पते॥

सजातीयविजातीयव्यावृत्त्यवमर्शे तु दर्शनवदसाधारणग्राहिण एव विकल्पाः स्युरिति सामान्यनिबन्धनसंबन्धग्रहणादिव्यवहाराभावाच्छब्दानुमाने प्रलयं प्रतिपद्येयाताम्।

## [4.4 व्यावृत्तिरान्तरा वा बाह्या वा]

व्यावृत्तिरपि बाह्या चेत्। तदवस्था कौमारिलदूषणाशनिः। आन्तरत्वे तु न तया विकल्पोपरागः कर्तुं शक्यः। नान्तर्न बहिरिति तु

**2 उभयावमर्शे ··· चेत्** ] Cf. *Nyāyamañjarī*, Kataoka [2009:31.3–5]: सजातीयविजातीयव्यावृत्ताकारोल्लेखे सर्वात्मना तन्निश्चयाद् विकल्पान्तराणां शब्दान्तराणां चाप्रवृत्तिः स्यात्।

**1 °व्यावृत्तिमेव** ] $MVA_1K_1Z_1^{pc}$; °व्यावृत्तिरपिमेव $Z_1^{ac}$ **2 °नर्थक्यमिति** ] $MVA_1Z_1$; °नर्थ्यमिति $K_1$ **2 नानर्थक्यम्** ] $MVK_1Z_1$; नानर्थक्य $A_1$ **3 निपतन्तः** ] $MVZ_1$; निपतति $M^{ka}A_1K_1$ **3 भवन्तु** ] $MVA_1Z_1$; भवतु $K_1$ **3 °र्थान्तरं** ] $MVK_1Z_1$; °र्थांतरे $A_1$ **3 वालम्बन्ताम्** ] $MVK_1Z_1$; वाचलंबंता $A_1$ **4 व्यावृत्तिं** ] $MVK_1Z_1$; व्यावृत्ति $A_1$ **4 अंशत आलम्बन्ते** ] $VK_1Z_1$; om. $MA_1$ **4 अंशतो नेति** ] $MVK_1Z_1$; यतो नेति $A_1$ **5 च भिन्नता** ] $MVK_1Z_1$; भिन्नत्वा $A_1$(unmetrical) **6 यतो ऽन्य°** ] $MVK_1Z_1$; यातान्य° $A_1$ **6 विकल्पानां** ] $M^{ka}A_1K_1Z_1$; विकल्पे न MV **7 °व्यावृत्त्यवमर्शे तु** ] $MK_1Z_1$; °व्यावृत्तविमर्शे तु $M^{kha}V$; °व्यावृत्त्यवमर्शेन $A_1$ **7 दर्शनव°** ] $MVK_1Z_1$; प° $A_1$ **7 °दसाधारण°** ] $MVA_1$; °दवधारण° $K_1$; °ददर्शन° $Z_1$ **8 °ग्रहणादि°** ] $MVA_1Z_1$; °ग्रहणादिग्रहणादि° $K_1$ **8 °व्यवहारा°** ] $VA_1K_1Z_1$; °व्यवदारा° M **9 °नुमाने** ] $MVA_1Z_1$; °नुमानो $K_1$ **11 कौमारिल°** ] $MVA_1Z_1^{pc}$; कौमारिळ° $K_1$; कौमारि° $Z_1^{ac}$ **12 आन्तरत्वे** ] $MK_1Z_1$; अन्तरत्वे V; आंतरन्ये $A_1$ **12 तया** ] $MVA_1K_1^{pc}Z_1$; तयो $K_1^{ac}$ **12 शक्यः** ] $MA_1Z_1$; शक्यते V; शक्यं $K_1$

भङ्गीभणितिमात्रम्।

तत्तादृशं किंचित्, न किंचिद्वा। न किंचिच्चेत्। न, तेन विकल्पानामनुरञ्जनस्योपपादयितुमशक्यत्वात्। अत्यन्तमसतश्च खरविषाणादेर्व्यवहारविषयत्वाभावाद् असत्ख्यातिनिरसननीतिमेव तत्रोत्तरीकरिष्यामः।

किंचिच्चेत्। नूनमन्तर्बहिर्वा तेन भवितव्यमेव। अतः कुमारिलादिष्टदूषणापनिनीषया यो ऽयमुत्प्रेक्षितः पन्था नूतनः, सो ऽपि सङ्कटः। तस्माद् यथाध्यवसायमेव तत्त्वमिति युक्तम्।

## [5 धर्मोत्तरोपन्यस्तदूषणस्योद्धरणम्]

### [5.1 भावाभावसंबन्धः]

बाह्ये च वस्तुनि शब्दान्तरोपनीयमानभावाभावसंबन्धाद्यपि न न

---

**8 यथाध्यवसायमेव तत्त्वमिति** ] Cf. *Nyāyamañjarī* I 63.15–16: तदुक्तं भवद्भिः "यथाध्यवसायमतत्त्वात् (°तत्त्वात् ] em.; °तत्त्वत्वात् M), यथातत्त्वं चानध्यवसायात्" इति।

**11 बाह्ये च … न न युज्यते** ] See section 2.7.1 of *Nyāyamañjarī*, Kataoka [2009:32].

---

**1 भङ्गीभणिति°** ] $Z_1$; भणितिभङ्गी° MV; भंगिः क्षणिति° $A_1$; भङ्गिभणिति° $K_1$ **3 °मनुरञ्जन°** ] $MVK_1Z_1$; °मंतरंजान° $A_1^{ac}$; °मंतरंजन° $A_1^{pc}$ **3 खर°** ] $MA_1K_1Z_1$; शश° V **4 असत्ख्याति°** ] $MVZ_1$; असत्व्याति° $A_1$; असंख्याति° $K_1$ **4 °निरसन°** ] $MVA_1Z_1$; °निरास° $K_1$ **5 °मेव तत्रोत्तरीकरिष्यामः** ] $K_1$; °मेवात्रोत्तरं करिष्यामः $MVA_1Z_1$ **6 भवितव्यमे°** ] $MVK_1Z_1$; --वितव्यमे° $A_1$ **7 °तः कुमारिला°** ] $MVZ_1$; °ब्यु कुमारिला° $A_1$; °तः कुमारिळा° $K_1$ **7 °मुत्प्रेक्षितः** ] $MA_1K_1Z_1$; °मुत्प्रक्षितः V **8 यथाध्यव°** ] $MVK_1Z_1$; यथो° $A_1$(marked) **8 °मेव तत्त्वमिति** ] $MK_1Z_1$; °मेवमिति $M^{kha}V$; °मेवंतत्वमिति $A_1$ **11 च** ] $MVZ_1$; त $A_1$; क $K_1$ **11 °रोपनीयमान°** ] $MVA_1Z_1$; °रोपनेय° $K_1$ **11 °बन्धाद्यपि** ] $MA_1K_1Z_1$; °बन्धावपि V

युज्यते। सर्वस्य गौरित्यादिशब्दजनितस्य ज्ञानस्यास्तित्वाद्यनपेक्ष्य सामान्यमात्रविषयत्वात्। आकाङ्क्षानिराकरणाय “अस्ति” “नास्ति” इत्यादि पदान्तरं प्रयुज्यमानं न न संबध्यते।

## [5.2 नियतरूपता]

नियतरूपता निश्चितनिजरूपे वस्तुनि वस्त्वन्तरव्यवच्छेदनिबन्धना सिध्यत्येव। घटो घट एव, न पट इति। नैतावता तदपोह एव प्रत्याय्यो भवतीत्यलमतिक्षोदेन।

## [5.3 बाह्यार्थे प्रवृत्तिः]

बाह्यार्थविषय एव व्यवहारो घटत इत्ययं कस्मात्।
दृश्यविकल्प्यावर्थावेकीकृत्य प्रवर्तते पुरुषः॥

---

**5 नियतरूपता** ] See section 2.7.2 of *Nyāyamañjarī*, Kataoka [2009:32–33].
**9 बाह्यार्थविषय एव व्यवहारो** ] See section 2.7.3 of *Nyāyamañjarī*, Kataoka [2009:33–34].

---

**1 न न युज्यते** ] $MK_1Z_1$ ; न युज्यते $M^{kha}A_1$ ; न न युज्येते V **1 सर्वस्य** ] $MVZ_1$ ; र्वस्य $A_1$ ; पूर्वस्य $K_1$ **1 गौरित्या॰** ] $MVK_1Z_1$ ; गोरित्या॰ $A_1$ **1 ॰द्यनपेक्ष्य** ] $MVA_1Z_1$ ; ॰द्यपेक्ष्य $K_1$ **2 आकाङ्क्षा॰** ] $MVK_1Z_1$ ; आका-- $A_1$ **2 ॰निराकरणा॰** ] $MVA_1^{pc}Z_1$ ; ॰निराकारणा॰ $A_1^{ac}$ ; ॰निवारणा॰ $K_1$ **3 ॰य “अस्ति” “नास्ति” इत्यादि॰** ] $K_1$ ; ॰यास्तिनास्ति॰ M ; ॰यास्ति नास्तीति $VA_1Z_1$ **3 न न संबध्यते** ] $K_1$ ; संबन्ध्यते M ; संबध्यते $VA_1$ ; न संबध्यते $Z_1$ **5 नियतरूपता** ] $MA_1K_1Z_1$ ; नियतरूपिता V **5 वस्त्वन्तर॰** ] $MA_1K_1$ ; वस्त्वन्तरस्य $VZ_1$ **5 ॰व्यवच्छेद॰** ] $MVK_1Z_1$ ; om. $A_1$ **5 ॰निबन्ध॰** ] $MA_1K_1$ ; ॰बन्ध॰ V ; ॰नबन्ध॰ $Z_1$ **6 ॰ना सिध्यत्येव** ] $MA_1K_1Z_1$ ; ॰नमिष्यते एव $M^{kha}V$ **6 घटो घट एव, न पट इति** ] $MVZ_1$ ; घट इति $A_1$ ; घट एव पट इति $K_1$ **6 तदपोह एव** ] $MA_1K_1Z_1$ ; तदपोह्य॰ $M^{kha}$ ; तदपोह्य एव V **7 प्रत्याय्यो** ] $MK_1$ ; प्रत्ययो $M^{kha}V$ ; प्रत्याय्यां $A_1$ ; प्रत्यायो $Z_1$ **7 ॰त्यलम॰** ] $MVK_1Z_1$ ; ॰त्युलम॰ $A_1$ **9 बाह्यार्थ॰** ] $MVK_1Z_1$ ; बाह्यार्थे $A_1$ **9 एव** ] $K_1$ ; एवं $MVA_1Z_1$ **9 व्यवहारो** ] $MVK_1Z_1$ ; व्यवहार एव $A_1$ **10 दृश्यविकल्प्या॰** ] $MVK_1$ ; दृढस्य विकल्प्या॰ $A_1$ ; दृश्यविकल्पा॰ $Z_1$ **10 पुरुषः** ] $MVA_1K_1Z_1^{pc}$ ; om. $Z_1^{ac}$(unmetrical)

एकीकारश्च कीदृग्, यदि पृथगमतिस्, तर्हि मूर्च्छाद्यवस्था-
साम्ये तत्र प्रवृत्तिः कथम्, अथ किमपि प्रस्फुरत्यर्थरूपम्।
तद् दृश्यं चेद्, अपोहव्यवहृतिरफलाथ द्वितीयं चकास्ति
स्वेनाकारेण तस्मिन् सति पथि पतिते चेष्टते कः सचेताः॥
स्फुरति यदि विकल्प्यं दृश्यरूपेण कामं
स भवति विपरीतप्रत्ययो नाविवेकः।
न वितथमतिबीजं विद्यते चेह किंचिन्
न च रविकरनीरज्ञप्तिवद् बाधिका धीः॥
अर्थप्राप्तिरतः सदर्थविषयज्ञानप्रबन्धोद्गता
साक्षादेव मणिप्रभामणिमतिन्यायेन किं कथ्यते।

---

**1 पृथगमतिस्** ] See section 4.2 of *Nyāyamañjarī*, Kataoka [2009:36–38], in particular Kataoka [2009:38.1]: तस्माद्भेदानध्यवसायादेव प्रवृत्तिः। **10 मणिप्रभामणिमतिन्यायेन** ] *Pramāṇavārttikasvavṛtti* ad I 97, 49.4–5: मणिप्रभायां मणिभ्रान्तिदर्शनेन व्यभिचाराच्च।; *Pramāṇavārttika* III 57, Tosaki [1979:127]: मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतः। मिथ्याज्ञानाविशेषे ऽपि विशेषो ऽर्थक्रियां प्रति॥

---

**1 पृथगमति°** ] MVK$_1$Z$_1$ ; पृथनम° A$_1$(unmetrical) **2 साम्ये तत्र** ] K$_1$ ; साम्यं तत्र MVZ$_1$ ; याम्यं तत्र A$_1$ **2 प्रस्फुरत्यर्थरूपम्** ] MZ$_1$ ; स्यात्प्रवृत्त्यर्थरूपम् M$^{kha}$V ; प्रस्फुरत्यतत्वरूपं A$_1$(unmetrical) ; प्रस्फुरत्यत्र रूपं K$_1$ **3 °फलाथ** ] MVK$_1$Z$_1$ ; °फला च A$_1$ **4 पथि** ] Z$_1$ ; सुनि° MV ; प्र A$_1$(unmetrical) ; पथ° K$_1$ **4 पतिते** ] MVA$_1^{pc}$K$_1$Z$_1$ ; पति A$_1^{ac}$(unmetrical) **4 चेष्टते** ] MVK$_1$Z$_1$ ; चेष्टत A$_1$ **5 विकल्प्यं** ] MVK$_1$Z$_1$ ; विकल्प्य A$_1$(unmetrical) **7 वितथ°** ] MVK$_1$Z$_1$ ; वितथा° A$_1$(unmetrical) **7 चेह** ] MA$_1$K$_1$ ; ह्यत्र V ; om. Z$_1$(unmetrical) **8 धीः** ] MVK$_1$Z$_1$ ; रीः A$_1$ **9 अर्थप्राप्तिरतः** ] MVK$_1$Z$_1$ ; अर्थप्राप्तिवद्बाधिका धीः अर्थप्राप्तिरतः A$_1$(eyeskip) **9 °प्रबन्धोद्गता** ] MVK$_1$Z$_1$ ; °प्रबन्धाद्गता M$^{ka}$A$_1$ ; °प्रबन्धाहता M$^{gha}$ **10 मणिप्रभामणिमति°** ] MVK$_1$Z$_1$ ; मणिमत्° A$_1$(unmetrical) **10 °न्यायेन** ] MVK$_1$Z$_1$ ; °न्यायन A$_1$(unmetrical)

## [6 उपसंहारः]

प्रामाण्ये सविकल्पकस्य कथिते बाह्यार्थसिद्धिः स्थिता
तद्व्यक्त्याकृतिजातिवाच्यकलने तावत्प्रवर्तामहे॥

---

**2 कथिते** ] $MVK_1Z_1$ ; **कथित** $A_1$(unmetrical) **3 तद्व्यक्त्या°** ] $MVK_1Z_1$ ; **तद्व्यर्था°** $A_1$ **3 तावत्प्र°** ] $MVZ_1$ ; **तावन्प°** $A_1$ ; **स्वस्थाः प्र°** $K_1$